# नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय-भारतीयदार्शनिकानुसन्धानपरिषदोः संयुक्ततत्त्वावधाने

## दर्शनशास्त्रपीठान्तर्गत-सर्वदर्शनविभागेन समायोजिता

# दशदिवसीया राष्ट्रिया सर्वदर्शनसङ्ग्रहग्रन्थस्वाध्यायकार्यशाला

**दिनाङ्कः** – 18.09.2023 तः 27.09.2023 यावत्

**समयः** – प्रातः10:00 वादनतः सायं 05:30 वादनं यावत्

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो,<br>
बौद्धाः बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।<br>
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः,<br>
सोऽयं नो विदधातु वांछितफलं त्रैलोक्यनाथो हरिः।।

## कार्यशालायाः परिचय उद्देश्यश्च

'विद्ययाऽमृतमश्नुते' 'विद्यया विन्दतेऽमृतम्' 'ऋते ज्ञानान्न मुक्तिः' इत्यादिश्रुतिवचनात् ज्ञायते यत् ज्ञानस्यैव प्राधान्यम्। तादृशं सम्यग्ज्ञानं शास्त्राध्ययनमन्तरा नैव सम्भवतीति मनसि निधाय अष्टादशविद्यास्थानेषु मानवमस्तिष्कभूतस्य दर्शनशास्त्रस्य वैशिष्ट्यं महत्त्वञ्चाभिलक्ष्य सर्वदर्शनसंग्रहस्य ग्रान्थिकाध्ययनकार्यशालेयं भारतीयदार्शनिकानुसन्धानपरिषदः आर्थिकसाहाय्येन 18.09.2023 तः 27.09.2023 दिनाङ्कं यावत् श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये सर्वदर्शनविभागेन समायोजयिष्यते। तत्र श्रीमाधवाचार्यप्रणीतसर्वदर्शनसङ्ग्रहग्रन्थरत्नेऽस्मिन् चार्वाकदर्शनमारभ्य शाङ्करदर्शनपर्यन्तं विविधदर्शनानां यो हि सिद्धान्तः, तमधिकृत्य शास्त्रपद्धत्या गभीरालोचनं भविष्यति। तत्र न हि प्रमाणमन्तरा प्रमेयस्य सिद्धिर्भवतीति शास्त्रीयवचनमनुसृत्यैव

प्रत्यक्षमेकमेव प्रमाणमिति अङ्गीकर्तृणां चार्वाकाणां मतमुररीकृत्य मूलग्रन्थे चतुर्ण्णां तत्त्वानां यादृशं विवेचनं विद्यते, तस्य विस्तृतं विश्लेषणं कार्यशालायां प्रेक्षावतां मोदाय आचार्यैः करिष्यते। प्रत्यक्षानुमानमिति प्रमाणद्वयाङ्गीकर्त्तृणां सौगतानाम् आर्यचतुष्टयविषये अनात्मवादविषये प्रतीत्यसमुत्पादविषये च यादृशी दृष्टिर्विद्यते, तस्याः दृष्टेः समुद्घाटनं विद्वद्भिः सम्प्रकाश्यते। आर्हतानां सर्वज्ञसिद्धौ बौद्धदर्शनसम्मतक्षणिकवादनिराकरणे पञ्चमहाव्रतनिर्णये तत्त्वमीमांसायां सप्तभङ्गीनयवादस्थापने मोक्षमार्गनिरूपणे च यच्चिन्तनं विद्यते, तस्य प्रकाशनं विद्वद्भिः सम्पादयिष्यते।

वैदिकदर्शनेषु श्रीरामानुजाचार्यस्य अनेकान्तवादनिराकरणे यादृशं गभीरं चिन्तनं विद्यते, तत्त्वमसीति महावाक्यार्थनिर्णये अद्वैतमतखण्डनेन सह वैष्णवाभिमततत्त्वानां निर्वचनमपि स्वाधीतग्रन्थदृष्ट्या विवेचयिष्यते आचार्यैः। जीव-ब्रह्मणोः भेदोऽस्तीति पूर्णप्रज्ञदार्शनिकानां यदभिमतानि विद्यन्ते, तैः सह तत्र प्रतिपादितेश्वरादितत्त्वानां मोक्षमार्गाणाञ्च विश्लेषणं ग्रन्थपद्धत्या करिष्यते सुधीभिः। नकुलीशपाशुपतशैवादिदर्शनेषु पशु-पति-पाशेति तत्त्वत्रयाणां निरूपणे मोक्षसाधननिरूपणे च एतेषां दार्शनिकानां यादृशमवदानं विद्यते, तेन सह अभिनवाभिव्यक्तिवादसमर्थने प्रत्यभिज्ञादर्शनकारस्य अभिनवगुप्तपादाचार्यस्य यादृशं सूक्ष्मातिसूक्ष्मचिन्तनं विद्यते, तस्य प्रकाशनं प्रेक्षावद्भिः करिष्यते। अनया रीत्या रसेश्वरदर्शने प्रतिपादिततत्त्वानां जीवन्मुक्तिस्वरूपाणां रस-परब्रह्मणोः स्वरूपमपि प्रकाशयिष्यते आचार्यैः। 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इति अभियुक्तिमाश्रित्य वैशेषिकदर्शने भावाभावयोः पदार्थयोः विवेचनं यथावैज्ञानिकं भवेत्, तदर्थं माधवाचार्यैः वैशेषिकदर्शनस्य यत् सारभूतचिन्तनं प्रकाशितम्, तेन सह पाकजप्रक्रियायां न्यायवैशेषिकयोः सूक्ष्मातिसूक्ष्मपरं चिन्तनवैचित्र्यं परमाणुसद्भावे च यत् प्रमाणं विद्यते, तत्सर्वं सुनिपुणं विभाव्याचार्यैः विभावयिष्यते।

प्रमाणतत्त्वस्याव्यर्हिततमत्वमिति अङ्गीकर्त्तृणामक्षपादीयानां यदभिमतं विद्यते, तत्रापि आधुनिकन्यायप्रणाल्यां न्यायाभिमतहेत्वाभासादिपदार्थानां यथोपयोगित्वं साधितं विद्यते, तत्स्वारस्यसमुद्घाटनं करिष्यते। वर्तमानसमये समाजे वेदस्य याथार्थ्यं यथा सुप्रतिष्ठितं भवेत्, तदर्थं जैमिनीयानां यादृशी दृष्टिर्विद्यते तत्रापि धर्मादिस्वरूपनिर्णये वेदाध्ययनप्रवृत्तिनिर्णये च आचार्याणां यादृशं विशिष्टं चिन्तनकौशलं विद्यते, तस्य याथार्थ्यं स्वाधीतग्रन्थपद्धत्या दर्शयिष्यते। 'मुखं व्याकरणं

स्मृत'मिति मुखात्मकस्य वेदाङ्गस्य व्याकरणशास्त्रस्याध्ययने यत् प्रयोजनम् एवञ्च तत्र शब्दाद्वैतब्रह्मवादे स्फोटवादस्यावधारणे च शाब्दिकानां यादृशी विचक्षणा बुद्धिर्संवलिता विद्यते, तस्याः स्वारस्यं प्रकाशयिष्यते विवेचकैः।

'साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः' इति भगवद्वचनानुरोधेन साङ्ख्ययोगयोः अभिन्नत्वेऽपि ज्ञाने प्राधान्यं साङ्ख्यस्य, बले च योगस्य प्राधान्यमिति सिद्धान्तं मनसि निधाय प्रकृतितः कथं जगदुत्पत्तिः, एवञ्च सत्कार्यवादसंस्थापने साङ्ख्यानां या दृष्टिः, पुनश्च कैवल्यप्राप्तावष्टाङ्गयोगस्य याः भूमिकाः विद्यन्ते तासां भूमिकानां विवेचनं विवेचयिष्यते विवेचकैः। सर्वेषां शास्त्रज्ञानां दार्शनिकानां साहित्यिकानां च परमार्थतः गतिः वेदान्तदर्शने भवतीति आभाणकं स्वीकृत्य, तत्रापि शङ्कराचार्यस्य अद्वैतप्रस्थानं सर्वोत्कृष्टं भवतीति च मनसि निधाय सत्तानिरूपणे जीवब्रह्मणोः तादात्म्यस्थापने विवर्तवादव्यवस्थापने महावाक्यार्थबोधसम्पादने च आचार्यशङ्करस्य या समीचीना नवीना पद्धतिः विद्यते, तस्याः पद्धतेः निरूपणं शास्त्राध्ययनवेलायां विद्वद्भिः सम्पादयिष्यते। येन समेषां विदुषामन्तेवासिनां प्रेक्षावतां समाजोन्नायकानाञ्च समेषां कल्याणं भूयादिति मनसि निधाय इयं कार्यशाला समायोजयिष्यते।

## कार्यशालायां भागग्रहणाय निर्देशाः

- कार्यशालायां भागग्रहणायावेदनम् सञ्चारमाध्यमेन (प्रदत्तसङ्केमाध्यमेन) पूरणीयम्। निर्दिष्टे काले पञ्जीकरणमनिवार्यम्। पञ्जीकरणं निःशुल्कं भविष्यति।
- आवेदनानां परिशीलनानन्तरं चयनसमित्या चिताः अभ्यर्थिनः ई-मेलमाध्यमेन संसूच्यन्ते।
- चितानामभ्यर्थिनां पुनः पञ्जीकरणमनिवार्यम्।
- NCR-क्षेत्रमतिरिच्य बाह्यप्रतिभागिभ्यो वातानुकूलित-तृतीयश्रेण्याः (A.C. 3-TIER) मार्गव्ययः भोजनावासव्यवस्था च प्रदीयते।
- कार्यशालायाम् आचार्याः, सहाचार्याः, सहायकाचार्याः, अध्यापकाः, शोधच्छात्राश्च भागग्रहणं कर्तुं शक्नुवन्ति।
- कार्यशालाया आयोजनं पूर्णतया भौतिकोपस्थितिमाध्यमेन (वाचस्पतिसभागारे) भविष्यति।
- प्रतिसत्रमुपस्थितिरनिवार्या। कार्यशालायां प्रदत्तकार्यम् अनिवार्यतया समयेन सम्पादनीयम्, सम्पादिताः प्रतिभागिन एव प्रमाणपत्रप्राप्तयेऽर्हाः भविष्यन्ति।

# कार्यशालायामामन्त्रिताः विद्वांसः



**प्रो. कृष्णकान्तशर्मा**
**पूर्वसंकायप्रमुखः**, सं.वि.ध.वि.संकायः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी



**प्रो. प्रदीपप्रभाकरगोखले**
**सेवानिवृत्त आचार्यः**, दर्शनविभागः,
सावत्रीबाई फुले पुणे विश्वविद्यालयः, पुणे



**प्रो. सच्चिदानन्दमिश्रः**
**सदस्यसचिवः**, भारतीयदार्शनिका-
नुसन्धानपरिषद्, नवदेहली



**प्रो. का.ई. देवनाथन्**
**आचार्यः**, विशिष्टाद्वैतवेदान्तविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः, तिरुपतिः



**प्रो. रामकिशोरत्रिपाठी**
**आचार्यः**, अद्वैतवेदान्तविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी



**प्रो. रामपूजनपाण्डेयः**
**आचार्यः**, न्यायवैशेषिकविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी



**प्रो. का. ई. धरणीधरन्**
**आचार्यः**, संस्कृतविभागः,
पुड्डुचेरी विश्वविद्यालयः, पांडिचेरी



**प्रो. जयकान्तसिंहशर्मा**
**पीठप्रमुखः**, वेदवेदाङ्गपीठम्,
श्रीला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली



**प्रो. हेरामत्रिपाठी**
**कुलपतिः**, कविकुलगुरुकालिदाससंस्कृत-
विश्वविद्यालयः, रामटेकनगरम्, महाराष्ट्रम्



**डॉ. मधुसूदनपेन्ना**
**अध्यक्षः**, भारतीयदर्शनसंस्कृतिसंकायः,
क.कु.का. सं.वि., रामटेकनगरम्,



**प्रो. धर्मचन्दजैनः**
**सेवानिवृत्त आचार्यः**, संस्कृतविभागः,
जोधपुरविश्वविद्यालयः, जोधपुरम्



**प्रो. सन्तोषकुमारशुक्ला**
**आचार्यः**, संस्कृतप्राच्यविद्याध्ययनसंस्थानम्,
जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली

## संरक्षकः



**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः,
श्रीला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली

## सान्निध्यम्



**प्रो. ए.एस्. आरावमुदन्**
**पीठप्रमुखः**, दर्शनशास्त्रपीठम्
श्रीला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली

## मार्गदर्शकः



**प्रो. प्रभाकरप्रसादः**
**अध्यक्षः**, सर्वदर्शनविभागः,
श्रीला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली

## संयोजकः



**प्रो. जवाहरलालः**
**आचार्यः**, सर्वदर्शनविभागः
श्रीला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली

## सह-संयोजकः



**डॉ. एस्. सुदर्शनन्**
**अध्यक्षः**, विशिष्टाद्वैतवेदान्तविभागः
श्रीला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली

## सह-संयोजकः



**डॉ. विजयगुप्ता**
**सहायकाचार्यः**, सर्वदर्शनविभागः
श्रीला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली

## सह-संयोजकः



**श्रीराजेशकुमारगुर्जरः**
**सहायकाचार्यः**, मीमांसाविभागः
श्रीला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली

**पञ्जीकरणाय अन्तिमतिथिः –** 02.09.2023

**पञ्जीकरणसङ्केतः –** https://forms.gle/DLjcVVqcfjufib7x9

**सम्पर्कसूत्रम् –**

| | | |
|---|---|---|
| **प्रो. जवाहरलालः** | – | 8178196970 |
| **डॉ. विजयगुप्ता** | – | 9716223831 |
| **श्रीराजेशकुमारगुर्जरः** | – | 9642361947 |